. In Public Domain. Digitization by eGangotri/Sarayu T

श्रीरस्तु

प्रबोधोत्सवराधादामोदरपूजा

ॐश्रीगणेशायनमः॥ देशकालौसंकीर्त्य ममसपत्नी
कस्य चातुर्मास्यव्रतसिद्धि पूर्वकउद्वासनद्वादश्यां
सकलपापक्षयकामः राधादामोदरपूजांकरिष्ये॥
ध्यायेच्चतुलसीदेवीश्यामांकमललोचनां।सर्वसौ
भाग्यदांदेवीं सर्वकामप्रदायिनीं।१।नीलकौशेय
वसनांहेमाभांकमलासनां।भक्तानांवरदांनित्यं वि
ष्णुरूपेनमोस्तुते।२।शंखचक्रगदापद्मश्रीगर्भ
शोभितं।पीतांबरधरंदेवं दिव्यरत्नविभूषितं।३।सुंद
रंपुंडरीकाक्षंकिरीटेनविराजितं।अनंतंचतुर्बा
ध्यासकृष्णंसलक्षयेत्।४।सहशीर्षा०।हिरण्यवर्णां०।
शांताकारं०।आवाहयामिदेवेशजगद्योनिजगत्पतिं।
तुलसीसंनिधावेहिकुरुंचकुरुसर्वदा।५।राधादामो
दराभ्यां०आवा०।कार्तस्वरमयंदिव्यनानामणिविभू
षितं।अनेकरत्नसंयुक्तंआसनंप्रतिगृह्यतां।६।सि
ंहासनेस्वर्णपीठेसर्वरत्नसमन्वितं।तुलसीसहितंवि
ष्णोआसनं०।७।पुरुष०।तोयमावाह०।आसनं०।
गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं।तोयमेतत्सु
खस्पर्शंपाद्यार्थंप्रतिगृह्यतां।८।देवदेवजगन्नाथगरु
डासनसंस्थित।तुलसीसहितंविष्णोपाद्यंचप्र०।९।ए
षार्घ०।अम्बुपूर्णं०।पात्रं०।निधानंसर्वरत्नानांत्वमर्घ्य
प्रदायिनी।तुलसिवंदनंतुभ्यंगृहाणार्घ्यंनमोस्तु
ते।१०।त्रिपादूर्ध्व०।कांस्यपात्रं०।अर्घ्यं०।एलालवं
गादिसुरभिस्वादुशीतलं।तोयमाचमनीयार्थंतुल
सिप्रतिगृह्यतां।११।गंगाजलंसमानीतंसुवर्णकलशे
स्थितं।आचम्यतांहृषीकेशत्रैलोक्याधिपतेहरे।१२
तस्माद्धिरण्य०।चंद्रप्रभासा०।आचमनीयं०।दधिना
मधुनाचैवतुलसिसंयुतंप्रिये।विष्णुमूर्तेगृहाणेद
मधुपर्कंप्रगृह्यतां।मधुपर्कं०।अभ्यंगस्नानंसुगंधतै
लेनाहर्तनंकुरु।दामोदरनमस्तुभ्यंहिमोभवसागरा
त्।१४।अभ्यंगस्ना०।पंचामृतेनस्नपनंकरिष्यामिसु
रोत्तम।क्षीरोदधिनिवासायलक्ष्मीकांतायतेनमः।१५
आप्यायस्व०।दधिक्रा०।घृतंमिमिक्षे०।मधुवाता०।स्वा
दुःपवस्व०।गंधद्वारां०।गंधोदकस्नानं॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

In Public Domain. Digitization by eGangotri/Sarayu T

C. In Public Domain. Digitization by eGangotri/Sarayu

मंदाकिनीगौतमी च यमुना च सरस्वती। नाभ्यः स्नाना
र्थमानीतं गृह्यतां ब्राह्मिरंजलं। १५। अथ सुरुषेण। उपेतुमां।
शुभोदकं। सर्वभूषाधिकं सौम्ये लोकलज्जानिवारणं।
त्रयोपपादितं तुभ्यं वाससी प्रतिगृह्यतां। १७। तथ वस्त्रं।
सुसिपासा। वस्त्रं। मुक्तामणिगुणोपेतं सुवस्त्रं चसु
खप्रदं। उत्तरीयं सुरश्रेष्ठं वरदेन। १८। दामोदरनम
स्तेस्तु ग्राहिमोभवसागरात्। ब्रह्मसूत्रं लोत्तरीयं गृ
ह्यतां परमेश्वर। १९। तस्माद्यज्ञात्सर्वहुतः संभृतं। पृ
षदाज्यं। यज्ञोपवीतं। अनेकरत्नखचितं सर्वाभरण
भूषितं। गृह्यतां भूषितेदेवि दृष्ट्वासिंचदेहिमे। २०।
आभरणं। हरिद्रारंजिता। कुंकुमंकांतिदं दिव्यं। अ
हितिभोगैः। परिमलद्रव्यं। गोदावरिनमस्तुभ्यं
सर्वसौभाग्यदायिनि। सर्वलक्ष्मीसंयुक्तं वरदेन
पूजये। २१। कंचुकीं। राजतं मंगलं वस्त्रं ब्रह्मणनिर्मि
तंपुरा। गृह्यतां भूषितभक्तयागृह्यतां परमेश्वरि। २२।
मंगलरूपं। गृह्यतांसुंदरेदेवि कज्जलं प्रतिगृह्यतां। सौ
भाग्यजननंदिव्यंतुभ्यमेनंप्रयच्छामि। २३। कज्जलं। नयु
गेविमलोनेत्रे दिव्यंकमनुत्तमं। कोसुभंनवमात्रंच
दत्तमित्रवभक्तितः। २४। हारं। तस्माद्यज्ञात्सर्वहुतः
संभृतं। चंदनं। अगरुकाश्मीरं। केतकीपाटलीजातिमल्लि
कासेवकानिच। पद्मानिचसुगंधीनिपुष्पाणिप्रतिगृह्यतां। २५। माल्यादीनि। तस्माद्यज्ञात्सर्वहुतः। अंगपूजा
तुलस्यै पादौ। दुर्गायै गुल्फौ। सावित्र्यै जानुनी। स
रस्वत्यै जंघे। भद्रकाल्यै कटिं। मंगलायै नाभिं। शि
वायै उदरं। क्षांत्यै हृदयं। धात्र्यै हस्तौ। स्वधायै
कंठं। रुद्राण्यै स्तनौ। कुमार्यै ललाटं। सिंहवाहि
न्यै नेत्रे। गधिकायै शिरः। देवदुमरसो। यत्पुरुषं।
आपस्तज्जं। धूपं। सार्जरसं चगुग्गुलं। आत्मनोस्य। आ
र्द्रांपुष्करिणीं। दिवं। शाल्योदनं पायसं चसितां घृ
तसमन्वितं। नानाभक्ष्यरसंयुक्तं नैवेद्यं। चेदमामन
आर्द्रांयः करिणीं यष्टिं। नैवेद्यं। मृगनाभिसमायु
क्तं कदलीसंप्रवासितं। आरागखंडनंयुक्तं कर्पू
रेणसंस्कृतं। २७। करोद्वर्तनं। इदंफलं। नाभ्याआ
सीं। फलं। पूगीफलंमहद्दिव्यं। सन्नास्यं।
यः शुचिः प्रयतोभूत्वा। तांबूलं॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

0. In Public Domain. Digitization by eGangotri/Sarayu



Kashi Maharani Collection, Ramnagar Fort, Varanasi

0. In Public Domain. Digitization by eGangotri/Sarayu

हिरण्यगर्भ॰। दक्षिणा॰। नीराजनंकरिष्यामि॰ पूरण
समन्वितं॰। अंधकारस्यनाशार्थमार्तिक्यं॰। २८। श्रिये
तः॰। नीराजनं॰। नानावर्णसुपुष्पाणिगृहीत्वापाणि
नाब्रवीत्। मंत्रपुष्पंप्रदास्यामिसामोदरत्नसंयुतं॰। २९।
यज्ञेनयज्ञ॰। मंत्रपुष्पं॰। ततः॰ ब्रह्मोवाच॰। कार्त्तिक्यां तु
शुक्लायांकार्त्तिकेमासिकेनरं॰ प्रस्नपंबोधयेद्यस्तु
श्रद्धाभक्तिसमन्वितः॰। ३०। ब्रह्मेंद्ररुद्राग्निकुबेरसूर्य
सोमादिभिर्वंदितवंदनीय। बुध्यस्वदेवेशजगन्नि
वासमंत्रप्रभावेनसुरेनदेव॰। ३१। त्वयिसुप्तेजग
न्मायजगत्सुप्तंभवेदिदं॰। उत्थितेचोत्थितंसर्वमुत्ति
ष्ठोत्तिष्ठमाधव॰। ३२। उत्तिष्ठोत्तिष्ठगोविंदत्यजनि
द्रांजगत्पते। त्वयिसुप्तेजगत्सुप्तमुत्थितेचोत्थितंभवे
त्॥ ३३। उत्तिष्ठो॰। यो जागारतमृचः कामयंतेयो
जागारतमुसामानयंति। यो जागारतमयंसोमआ
हतमाहमस्मिसर्व्वेनोकः। अग्निर्जागारतमृचः
कामयंतेग्निर्जागारतमुसामानयंति। अग्निर्जाग
रतमयंसोमआहतमाहमस्मिसर्व्वेनोकः। जा
गर्षिंसंसुवनेजातवेदो जागर्षियन्नयजतेहविष्मा
न्। इदंहविः॒ अदधान्नोसुतोमितेनपासिसुष्व॒ मा
मघोनः। चंद्रमानंदकुर्यात्॥ ततोविघ्नंहकुर्यात्॥ पु
ष्पांजलिंसमर्पणोत्तरं॰। इंदुधात्रीकपित्थानिबदर्य
दिफलानिच। तुलसीसहितोविष्णोस्तुष्ट्यर्थंप्रीणि
त्यतो॰। ३४। धात्र्यादिफलानि॥ येननोकायननया
यधान्य॰ बीजंवहध्वेअक्षितं। अस्मभ्यंतद्धनं
यद्वईमहेराधोविश्वायुसौभगं। धातादात्रंसुव
नस्यस्पतिर्देवंत्वष्टारमभिमातिषाहं। इंद्रंयज्ञ
मश्विनोबृहस्पतिर्देवाः पांतुयजमानंन्यर्थात्॥ नैवेद्यं
नीराजनेततोभक्त्यामंगलंसमुदीरयन्। जयमंगलंवि
ष्णोदेववंदवनस्पते॰। श्रियेजातः। नीराजनदीपं॰।
यज्ञेतेयज्ञमयजंतदेवाः। मंत्रपुष्पं॰। यानिकानि
च॰। प्रदक्षिणां। अन्यथाशरणं॰। नमस्कारः।
निर्म्मितासुरपापघ्नीकर्म्मणात्वंसुरासुरैः। नुतसिद्ध
रमेशानपूजांगृह्णममोस्तुते। ३५। श्रियंदेहियशो
देहिकीर्तिमायुस्तथासुखं। बलंपुष्टिंतथाधर्मं

Rashi Maharani Collection, Ramnagar Fort, V

. In Public Domain. Digitization by eGangotri/Sarayu

न्यूनातिरिक्तानि परिस्फुरन्तु यानि यानी कृतानि
मया कृतानि। सम्यापि चैतानि सुरेन्द्रवन्द्य
स्याहि तुष्टः पुनरागमाय ३८। यस्यस्म
स्या०॥ अनेनयथाशक्ति यथा ज्ञानेनच
याकृतेनषोडशोपचारैः पूजाख्येनक
र्मणाश्रीराधादामोदरौ श्रीयेताम्